# दशम: पाठ: । पितृभक्त: नचिकेता:।

वेदा:, ब्राह्मणा:, आरण्यका: उपनिषद: इति वेदवाङ्मयपरम्परा वर्तते। एतस्यां परम्परायां प्रमुखा: दश उपनिषद: ख्याता:। उपनिषत्सु तत्त्वज्ञानचर्चा-निरूपणं वर्तते। उपनिषत्सु अन्यतमा 'कठोपनिषद्'। कठोपनिषद: उद्धृता यम-नचिकेतसो: कथा।






**वाजश्रवा:** नाम दानपर: ब्राह्मण: आसीत्। एकदा स: विश्वजित्-यज्ञम् अकरोत्। समाप्ते यज्ञे स: ब्राह्मणेभ्य: दक्षिणाम् अयच्छत्। दक्षिणायां सर्वदा प्रियं वस्तु यच्छेत् इति नियम:। किन्तु पिता **वाजश्रवा:** तु दक्षिणारूपेण दुग्धदाने असमर्था: दुर्बला: वृद्धा: च धेनू: अयच्छत्। तस्य पुत्र: **नचिकेता:** तद् अपश्यत्। असमीचीनदानेन पिता मे नरकं गमिष्यति इति भीत्या स: पितरम् अपृच्छत्, ''पित:, किं तव अतीव प्रियम् ?'' झटिति पिता अवदत्, ''वत्स, त्वमेव मम प्रियतम:।'' **नचिकेता:** पुन: अपृच्छत्, ''तर्हि मां कस्मै दास्यति भवान्?'' **वाजश्रवसा** किमपि उत्तरं न दत्तम्। द्विवारं त्रिवारं **नचिकेतसा** तदेव पृष्टम्। तदा क्रुद्ध: भूत्वा पिता **नचिकेतसम्** ''अहं त्वां मृत्यवे ददामि'' इति अवदत्।

पिता क्रोधावेशे एवम् उक्तवान् इति **नचिकेता:** अजानात्। तथापि पितु: आदेशपालनार्थं स: यमपुरम् अगच्छत्। यमपुरे यम: अनुपस्थित:। बाल: **नचिकेता:** तत्रैव त्रीणि दिनानि यावत्, किमपि अभुक्त्वा अपीत्वा यमस्य प्रतीक्षाम् अकरोत्।

चतुर्थे दिवसे यम: यमपुरं प्राप्त:। क्षुधार्तं पिपासार्तं बालातिथिं दृष्ट्वा तस्य हृदयं करुणया अद्रवत्। यम: **नचिकेतसं** 'त्रीन् वरान् याचस्व' इति अवदत्। तत: बालक: प्रथमं वरम् अयाचत, ''मम जनकस्य **वाजश्रवस:** मां प्रति क्रोध: शान्त: भवतु।'' ''स्वर्गसाधिकाम् अग्निविद्यां दत्त्वा माम् अनुगृह्णातु'' इति द्वितीयं वरं स:

अयाचत। यम: आनन्देन वरौ प्रायच्छत्। तत: तृतीयवररूपेण **नचिकेता:** आत्मज्ञानम् अयाचत। तस्य प्रार्थनां श्रुत्वा यम: चकित:। न कोऽपि मर्त्य: अद्यपर्यन्तं तद् ज्ञातुकाम:। **अल्पवयस:** बालस्य कथमिव प्रगल्भा ज्ञानतृष्णा ? यम: विविधप्रलोभनै: **नचिकेतसं** तृतीयवरात् निवारयितुं प्रायतत। किन्तु निश्चल: **नचिकेतस:** निर्णय:। अन्ते वरं दातुं वचनबद्ध: यम: तं ज्ञानिनामपि दुर्लभम् आत्मज्ञानम् उपादिशत्।

## भाषाभ्यास:



### १. एकवाक्येन उत्तरत।

अ) वाजश्रवा: क: ?

आ) दक्षिणायां किं यच्छेत् इति नियम: ?

इ) वाजश्रवस: पुत्र: क: ?

ई) तृतीयवररूपेण नचिकेता: किम् अयाचत ?

उ) बाल: नचिकेता: कति दिनानि यावत् यमस्य प्रतीक्षाम् अकरोत् ?

### २. माध्यमभाषया उत्तरत।

अ) नचिकेता: यमपुरं किमर्थम् अगच्छत् ?

आ) के त्रय: वरा: नचिकेतसा याचिता: ?

### मौखिककार्यम्

**१) यथाक्रमं वदत।**

अ) चतुर्थे दिवसे यमस्य यमपुरम् आगमनम्।

आ) बालनचिकेतस: अभुक्त्वा अपीत्वा यमस्य प्रतीक्षा।

इ) क्षुधार्तस्य बालातिथे: दर्शनम्।

ई) नचिकेतस: त्रीणि दिनानि यावत् तितीक्षा।

उ) यमेन वरत्रयं दत्तम्।

### पठत अवगच्छत ! विश्वं विसर्गस्य।

• अम्भोधिर्जलधि: पयोधिरुदधिर्वारान्निधिर्वारिधि:।

अम्भोधि: + जलधि:
पयोधि: + उदधि:
+ वारान्निधि: + वारिधि: } **र्रूप: विसर्ग:**

परोपकार: कर्तव्य: प्राणैरपि धनैरपि।

प्राणैरपि = प्राणै: + अपि।
धनैरपि = धनै: + अपि। } **र्रूप: विसर्ग:**

• उत्तमा मध्यमा नीचास्तिस्रो वै प्राणिनां विधा:।
परार्थस्वार्थविध्वंसा लक्षणानि यथाक्रमम्।।

उत्तमा: + मध्यमा:
परार्थस्वार्थविध्वंसा: + लक्षणानि } **लोपी विसर्ग:**

• मा मनो मधुपो मेघो मद्यपो मर्कटो मरुत्।
मक्षिका मत्कुणो मत्स्यो मकारा दश चञ्चला:।।

मन: + मधुप: + मेघ: + मद्यप: + मर्कट: + मरुत्।
मत्कुण: + मत्स्य: + मकारा:। **ओकाररूप: विसर्ग:**
मकारा: + दश। **लोपी विसर्ग:**

• स हि भवति दरिद्रो यस्य तृष्णा विशाला।
मनसि च परितुष्टे कोऽर्थवान् को दरिद्र:।।

दरिद्र: + यस्य
क: + दरिद्र: } **ओकाररूप: विसर्ग:**

**(विसर्गस्य परिवर्तनं निरीक्षध्वम्।)**

# क्रियापदं किं कथयति? – २

**अत्र भिन्नं पदं किम् ?**

| | | |
|---|---|---|
| गणयति | सूचयते | कथयति |
| धारयति | पूज्यते | ताडयते |
| घोषयते | चोरयति | क्षालयति |

उत्तरम् – ________

क्रियापदानि वाक्ये अन्विष्यत।
१. सुवर्णं सर्वश्रेष्ठं गण्यते। २. सौजन्यं श्रेष्ठम् उच्यते। ३. चित्रे नदी दृश्यते।
एतेषां समानता का?
१. प्रत्यय: – ☐ २. मूलधातु: + ☐

**एतानि वाक्यानि पठत।**

१. रामेण **ग्रन्थ: पठ्यते**।
२. रामेण **ग्रन्थौ पठ्येते**।
३. रामेण **ग्रन्था: पठ्यन्ते**।
४. रामेण **अहं दृश्ये**।
५. रामेण **आवां दृश्यावहे**।
६. रामेण **वयं दृश्यामहे**।

एतेषु वाक्येषु क्रियापदं कर्मपदस्य पुरुषं वचनं च अनुसरति। यदि कर्मपदं परिवर्तते तर्हि क्रियापदम् अपि परिवर्तते अत: कर्मप्रधानानि वाक्यानि इमानि।

**कर्मवाच्य: प्रयोग:। (कर्मणि प्रयोग:)**

| कर्ता | कर्म | क्रियापदम् |
|---|---|---|
| तृतीया विभक्ति: | **प्रथमा विभक्ति:** | **कर्मपदस्य पुरुषवचनानुसारम्** |

१) मधुरया सुधाखण्डा: आनीयन्ते।




**क्रियापदं कर्मपदम् अनुसरति।**
**अत: कर्मवाच्यं क्रियापदम् इदम्।**

२) अस्माभि: ग्रन्थ: पठ्यते।




**क्रियापदं कर्मपदम् अनुसरति।**
**अत: कर्मवाच्यं क्रियापदम् इदम्।**

**पठत बोधत !!**

## व्यासगणेशकथा।

भगवता व्यासमुनिना महाभारतं नाम महाकाव्यं **विरच्यते**। एतस्मात् सन्तुष्ट: ब्रह्मदेव: तस्य पुरत: आविर्भवति। तदा व्यासेन नम्रेण **प्रणम्यते**। ब्रह्मदेवेन **कथ्यते**, ''हे मुने, त्वया यत् काव्यं विरचितं तस्य लेखनं कर्तव्यम्'' इति। व्यासमुनिना **उच्यते**, ''देव, मम काव्यस्य लेखनार्थं नास्ति योग्य: लेखक:।'' ब्रह्मदेवेन **कथ्यते**, ''श्रीगणेश: तव काव्यं लिखेत्। त्वया स: प्रार्थनीय:।'' तत: ब्रह्मदेवेन **निर्गम्यते**।

व्यासमुनिना श्रीगणेश: **आहूयते**। श्रीगणेशेन प्रणम्य **कथ्यते**, ''मुनिवर, मया किं करणीयं तत् आदिशतु।'' व्यासमुनिना **कथ्यते**, ''गणेश, त्वया मम काव्यं लेखितव्यम्।'' गणेशेन **उच्यते**, ''अवश्यं लिखामि। किन्तु भवता सर्वे श्लोका: अविरतं कथयितव्या:।'' व्यासमुनिना **उच्यते**, 'तथास्तु। किन्तु त्वया अपि एकस्य अपि अक्षरस्य अर्थम् अज्ञात्वा न लेखितव्यम्।'' श्रीगणेशेन **कथ्यते**, ''आम्, तथा करोमि'' इति। तदनन्तरं व्यासमुनिना श्लोका: **कथ्यन्ते** गणेशेन ते **लिख्यन्ते**। व्यासमुनिना कठिना: श्लोका: **कथ्यन्ते** तदा गणेशेन चिन्तनं **क्रियते** अर्थ: **ज्ञायते** **लिख्यते** च।